# कल्किपुराणम् ।

महर्षिवेदव्यासप्रणीतम् ।

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
संस्कृतं प्रकाशितञ्च

# KALKIPURANA

By
MAHARSHI VEDAVYASA

EDITED AND PUBLISHED
PANDIT JIBANANDA VIDYASAGARA,

आनन्द प्रिंटिंग प्रेस
सी २७/१७० - ए जगतगंज, वाराणसी – २

# कल्किपुराणम् ।

## महर्षिवेदव्यासप्रणीतम् ।

पण्डित कुलपतिना
वि० ए० उपाधिधारिणा

**श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण**

संस्कृतं प्रकाशितञ्च

# KALKIPURANA

By

## MAHARSHI VEDAVYASA

EDITED AND PUBLISHED

PANDIT JIBANANDA VIDYASAGARA, B. A.
*Superintendent Free Sanskrit College, Culcutta.*

कलिकातानगर्य्यां नारायणयन्त्रे मुद्रितम् ।
ई० १८९० ।

पुनर्मुद्रण – १९९१

**आनन्द प्रिंटिंग प्रेस**
सी २७/१७० - ए जगतगंज, वाराणसी – २

# कल्किपुराणस्य सूचीपत्रम् ।


१ अंशः । १ अध्यायः ।

| | |
|---|---|
| मङ्गलाचरणम् | १ |
| सूतसमीपे शौनकादीनां महर्षीणां भविष्यप्रश्नः | १ |
| शुकस्य कल्किपुराणप्राप्तिविवरणम् | २ |
| कलेरुत्पत्तिः | २ |
| कलिविवरणम् | ३ |
| कलौ आचारभ्रंशः | ३ |
| धरित्र्या सह देवानां ब्रह्मलोकगमनम् | ४ |
| ब्रह्मलोकवर्णनम् | ४ |
| २ अध्यायः । ब्रह्मसमीपे कलेर्दोषकीर्त्तनम् | ५ |
| ब्रह्मणा सह देवानां गोलोके गमनम् | ५ |
| विष्णुसमीपे निवेदनम् | ५ |
| विष्णोर्विष्णुयशसो गृहे अवताराङ्गीकारः | ५ |
| विष्णुयशसः पत्न्याः सुमत्या गर्भः | ६ |
| विष्णौ जाते देवानां हर्षः | ६ |
| विष्णोश्चतुर्भुजमूर्त्तिपरिहारपूर्वकं मानुषरूपधारणम् | ७ |
| रामकृपव्यासादीनां कल्किदर्शनार्थमागमनम् | ७ |
| कल्केर्नामकरणम् | ७ |
| कल्केरुपनयनकाले पितुरुपदेशः | ८ |
| ३ अध्यायः । कल्केर्गुरुकुलवासार्थं यात्रा जामदग्न्यप्राप्तिश्च | ९ |
| कल्केर्वेदाध्ययनं धनुर्वेदशिक्षा च | १० |

# कल्किपुराणम् ।

## प्रथमोऽध्यायः ।

सेन्द्रा देवगणा मुनीश्वरजना लोकाः सपालाः सदा
स्वं स्वं कर्म्म सुसिद्धये प्रतिदिनं भक्त्या भजन्त्युत्तमाः ।
तं विघ्नेशमनन्तमच्युतमजं सर्वज्ञसर्वाश्रयं
वन्दे वैदिकतान्त्रिकादिविविधैः शास्त्रैः पुरोवन्दितम् ॥१॥

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥ २ ॥

यद्दोर्दण्डकरालसर्पकवलज्वालाज्वलद्विग्रहाः
नेतुः सत्करवालदण्डदलिता भूपाः क्षितिक्षोभकाः ।
शश्वत् सैन्धववाहनो द्विजजनिः कल्किः परात्मा हरिः
पायात् सत्ययुगादिकृत् स भगवान् धर्म्मप्रवृत्तिप्रियः ॥ ३ ॥

इति सूतवचः श्रुत्वा नैमिषारण्यवासिनः ।
शौनकाद्या महाभागाः पप्रच्छुस्तं कथामिमाम् ॥ ४ ॥

हे सूत ! सर्वधर्म्मज्ञ ! लोमहर्षणपुत्त्रक ! ।
त्रिकालज्ञ ! पुराणज्ञ ! वद भागवतीं कथाम् ॥ ५ ॥

कः कलिः ? कुत्र वा जातो जगतामीश्वरः प्रभुः ।
कथं वा नित्यधर्म्मस्य विनाशः कलिना कृतः ? ॥ ६ ॥

वायुलोलल्लताजालकुसुमालिकुलाकुलैः ।
प्रणामाह्वानसत्कारमधुरालापवीक्षणैः ॥ ४३ ॥
तद्ब्रह्मसदनं देवाः सेश्वराः क्लिन्नमानसाः ।
विविशुस्तदनुज्ञाता निजकार्य्यं निवेदितुम् ॥ ४४ ॥
त्रिभुवनजनकं सदासनस्थं सनकसनन्दनसनातनैश्च सिद्धैः ।
परिसेवितपादकमलं ब्रह्माणं देवता नेमुः ॥ ४५ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कलिविवरणं
नाम प्रथमोऽध्यायः ।

---

## द्वितीयोऽध्यायः ।

सूत उवाच । उपविष्टास्ततो देवा ब्रह्मणो वचनात् पुरः ।
कलेर्दोषाद्धर्म्महानिं कथयामासुरादरात् ॥ १ ॥
देवानां तद्वचः श्रुत्वा ब्रह्मा तानाह दुःखितान् ।
प्रसादयित्वा तं विष्णुं साधयिष्याम्यभीप्सितम् ॥ २ ॥
इति देवैः परिवृतो गत्वा गोलोकवासिनम् ।
स्तुत्वा प्राह पुरो ब्रह्मा देवानां हृदयेप्सितम् ॥ ३ ॥
तत् श्रुत्वा पुण्डरीकाक्षो ब्रह्माणमिदमब्रवीत् ।
शम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम् ।
सुमत्यां मातरि विभो ! कन्यायां त्वन्निदेशतः ॥ ४ ॥
चतुर्भिर्भ्रातृभिर्देव ! करिष्यामि कलिक्षयम् ।
भवन्तो बान्धवा देवाः स्वांशेनावतरिष्यथ ॥ ५ ॥
इयं मम प्रिया लक्ष्मीः सिंहले सम्भविष्यति ।
बृहद्रथस्य भूपस्य कौमुद्यां कमलेक्षणा ।
भार्य्यायां मम भार्य्यैषा पद्मानाम्नी जनिष्यति ॥ ६ ॥

If any deffect is found in this book, Please return the copy by V. P. P. to the publisher for exchange free of cost of postage.